सोम्बुधिरशनावासां भुनक्ति भूमिं भुजिष्योपि १८०

अन्वयः-(यस्य पाणौ सदंडं छत्रं चामरयुग्मं प्रतिष्ठितं भवति-सभुजिष्यः अपि अम्बुधिरशनावासां भूमिं भुनक्ति) अस्यार्थः-जिसके हाथमें दंडसहित छत्र और दोनों चमर प्रतिष्ठित कहिये होयँ सो पुरुष दासभी होय तौ समुद्रही है रशना और वसन जिसके ऐसी पृथ्वीके भोगनेवाले होते हैं ॥ १८० ॥

विप्रस्य यस्य यूपो वेदनिभं ब्रह्मतीर्थमपि हस्ते ॥
विश्वाधिपतिर्नियतं स भवेदथवाग्निहोत्रीशः ॥ १८१ ॥

अन्वयः-(यस्य विप्रस्य हस्ते यूपः वेदनिभं-ब्रह्मतीर्थं अपि स नियतं विश्वाधिपतिः अथवा स अग्निहोत्रीशः भवेत्) अस्यार्थः-जिस ब्राह्मणके हाथमें यज्ञस्तंभके और वेदके तुल्य और ब्रह्मतीर्थके आकार रेखा होयँ तौ वे पुरुष निश्चय जगत्का पति अथवा अग्निहोत्री होत हैं ॥ १८१ ॥

भाग्येन भवन्ति यवाः पुंसामंगुष्ठपर्वसु स्पष्टाः ॥
पोषविशेषनिमित्तं कर्मकरं यशस्तुरंगः स्यात् ॥ १८२ ॥

अन्वयः-(यस्य अंगुष्ठस्य यवाः पर्वसु पुंसां भाग्येन स्पष्टाःभवंति-पोषविशेषनिमित्तं कर्मकरं यशः तथा तुरंगः स्यात्) अस्यार्थः-जिसके अँगूठेके पोरुवेमें जौका चिह्न पुरुषोंके भाग्य वशकरिके

प्रकट होय तो वे पालन करनेके विशेष कारणसे कर्म करनेके यश और घोड़े होते हैं ॥ १८२ ॥

सुतवंतः श्रुतवन्तो जायन्तेंगुष्ठमूलगैस्तु यवैः ॥
मध्यगतैर्धनकाञ्चनरत्नाढ्या भोगिनः सततम्॥१८३

अन्वयः-(अंगुष्ठमूलगैः यवैः सुतवन्तः श्रुतवन्तो जायन्ते तथा मध्यगतैः यवैः धनकांचनरत्नाढ्याः सततं भोगिनो भवंति) अस्यार्थः-जिसके अंगूठेकी जड़में जौका चिन्ह होय तौ पुत्र और शास्त्रवाला होय-और जिसके अंगूठेके बीचमें जौका चिन्ह होय तौ वह धन सुवर्ण रत्नोंकरिके सदा भोगनेवाला होता है ॥ १८३ ॥

त्रिपरिक्षेपामूलेंऽगुष्टगता भवति यस्य यवमाला ॥
द्विपसुसमृद्धः सपुमान्राजा वा राजसचिवो वा १८४॥

अन्वयः-(यस्य अंगुष्ठगता मूले यवमाला त्रिपरिक्षेपा भवति-स पुमान् द्विपसुसमृद्धः राजा वा राजसचिवो भवति) अस्यार्थः-जिसके अंगूठेकी जड़में जौमालाकी तिलड़ी होय सो पुरुष हाथियोंकी ऋद्धिसमेत राजा वा राजमंत्री होता है ॥१८४ ॥

यस्य द्विपरिक्षेपा सैव नरो राजपूजितः स स्यात् ॥
यस्यैकपरिक्षेपा यवमाला सोपि वित्ताढ्यः ॥१८५॥

अन्वयः-(यस्य सा एव यवमाला द्विपरिक्षेपा स नरः राजपूजितः स्यात्-यस्य यवमाला एक परिक्षेपा स अपि वित्ताढ्यः स्यात्) अस्यार्थः- जिसके वही जौमाला दुलड़ी होय सो पुरुष राजका पूजनीय होय-और जिसके जौमाला एक होय सो धनी होता है १८५॥

यस्यांगुष्ठाधस्तात्काकपदं भवति विस्पष्टम् ॥
स नरः पश्चिमकाले शूलेन विपद्यते सद्यः ॥१८६॥

अन्वयः—(यस्य नरस्य अंगुष्ठाधस्तात्काकपदं विस्पष्टं भवति स नरः सद्यः पश्चिमकाले शूलेन विपद्यते) अस्यार्थः—जिस पुरुषके अंगूठेके नीचे जो कौवेके आकार चिह्न प्रकट होय सो मनुष्य शीघ्रही पिछली अवस्थामें शूलसे माराजाय ॥ १८६ ॥

अव्यक्ताः स्युस्तनवःखंडा रेखाथकरे स्थिता यस्य ॥
तिग्मांशोरिव रजनी श्रीस्तस्य पलायते सततम् १८७

अन्वयः—(यस्य करे रेखाः अव्यक्ताः खंडाः तनवः स्थिताःस्यु तस्यश्रीः सततं पलायते तिग्मांशोः रजनी इव पलायते) अस्यार्थः— जिसके हाथकी रेखा स्वच्छ नहीं होय खंडित होय और बहुत पतली होय तिसके लक्ष्मीजी सदा नहीं रहै भगिजाती है जैसे सूर्यसे रात्रि भगिजाती है ॥ १८७ ॥

एवमपरापि पाणौ शुभसंस्थाना शुभावहा रेखा ॥
किंबहुना मनुजानामशुभा पुनरशुभसंस्थाना ॥१८८॥

अन्वयः—(एवं मनुजानां पाणौ अपरापि शुभसंस्थाना रेखा शुभावहा बहुना किं पुनः अशुभसंस्थाना रेखा अशुभा) अस्यार्थः— ऐसेही मनुष्योंके हाथमें औरभी शुभ रेखा शुभके करनेवाली होती हैं बहुत कहनेसे क्याहै फिरभी अशुभ रूप रेखा अशुभ होतीहै १८८

ऋजुरंगुष्ठः स्निग्धास्तुंगोवृत्तःप्रदक्षिणावर्त्तः ॥
अंगुष्ठोपि धनवतां सुघनानि समानि पर्वाणि ॥१८९॥

अन्वयः—(धनवतां अंगुष्ठःअपि ऋजुः स्निग्धः तुंगः वृत्तः प्रदक्षिणावर्तो भवति च पुनःधनवतां अंगुष्ठःअपि सुघनानि वा समानि पर्वाणि भवंति) अस्यार्थः—धनवानोंका अंगूठा सूधा चिकना ऊंचा गोल दाहिनी ओर झुकाहुवाहोताहै और धनवानोंके अंगूठेमेंभी कठिन और बराबर पोरुवे होतेहैं ॥ १८९ ॥

सततं भवंति वलिताः सौभाग्यवतां सुमेधसां सूक्ष्माः॥
पाण्यंगुलयः सरला दीर्घा दीर्घायुषां पुंसाम् ॥ १९० ॥

अन्वयः–(सौभाग्यवतां सुमेधसां पुंसां पाण्यंगुलयः सततं वलिताः भवन्ति तथा दीर्घायुषां पुंसां सरला वा दीर्घा भवन्ति) अस्यार्थः–भाग्यवान् और बुद्धिमान् पुरुषोंके हाथकी अंगुली निरंतर मिली हुई होती हैं और बडी आयुवाले पुरुषोंकी अंगुली सूधी और बडी होती हैं ॥ १९० ॥

नियतं कनिष्ठिकांगुलिरनामिकापर्व उल्लंघ्य ॥
यद्यधिकतरा पुंसां धनमधिकं जायते प्रायः ॥१९१॥

अन्वयः–(यदि पुंसां कनिष्ठिकांगुलिः नियतं अनामिकापर्व उल्लंघ्य आधिकतरा भवति प्रायः अधिकं धनं जायते) अस्यार्थः–जो पुरुषकी कनिष्ठिका छोटी अंगुली निरंतर अनामिका अंगुलीके पोरुवेको उलोंघिकरि अधिक होतौ बहुधा धन अधिक होय ॥ १९१ ॥

दीर्घायुरंगुलीभिः सौभाग्ययुतः सुदीर्घपर्वाभिः ॥
विरलाभिः कुटिलाभिःशुष्काभिर्भवति धनहीनः॥१९२

अन्वयः–(दीर्घाभिः अंगुलीभिः दीर्घायुर्भवति च पुनः दीर्घपर्वाभिः अंगुलीभिः सौभाग्ययुतः स्यात् तथा विरलाभिः कुटिलाभिः शुष्काभिः अंगुलीभिः धनहीनो भवति) अस्यार्थः–लंबी अंगुलियों करिके बडी आयुवाला होय और बडे पोरुवोंकी अंगुली से भाग्यवान् होय और धनी नहीं टेढी सूधी पतली अंगुलियोंसे धनहीन अर्थात् दरिद्री होताहै ॥ १९२ ॥

स्थूला धनोज्झितानां शस्त्रान्वितानां बहिर्नताः पुंसाम् ॥
ह्रस्वांगुल्यश्चिपिटाश्चेटानां हन्त जायन्ते ॥ १९३ ॥

अन्वयः-(धनोज्झितानां पुंसां स्थूला भवंति शस्त्रान्वितानां पुंसां बहिर्नताः भवंति हंत चेटानां पुंसां ह्रस्वाः चिपिटाः अंगुल्यो भवंति) अस्यार्थः--धनरहित पुरुषोंकी अंगुली मोटी होतीहैं और हथियारवाले पुरुषोंकी अंगुली बाहिरको झुकी होती हैं और बडे खेदकी बात है कि दासोंकी अंगुली छोटी और चपटी होती हैं ॥ १९३ ॥

अंगुष्ठांगुलयो वा संख्यान्यूनाधिकाः स्फुटं यस्य ॥
धनधान्यैः परिहीनः सोल्पायुर्भूतले भवति ॥१९४॥

अन्वयः-(यस्य अंगुष्ठांगुलयःवा स्फुटं न्यूनाधिकाःसंख्याः भवंति स भूतले धनधान्यैः परिहीनः अल्पायुर्भवति) अस्यार्थः-जिसके अंगूठेकी अंगुली प्रकट कमती बढती जैसे पांच से छठी संख्या हो सो पृथ्वीमें धनधान्य करके हीन और थोडी आयुवाला होताहै॥१९४॥

छिद्रे मिथः कनिष्ठानामामध्यप्रदेशिनां स्यात् ॥
वृद्धत्वे तारुण्ये बाल्ये क्रमशो नरस्य सुखम् ॥१९५॥

अन्वयः-(यस्यकनिष्ठाअनामिकामध्यमाप्रदेशिनांमध्ये यदि छिद्रं स्यात् नरस्य वृद्धत्वे तारुण्ये बाल्ये क्रमशः सुखं भवति)अस्यार्थः-जिसकी कनिष्ठिकामें छिद्र होयतौ बूढेपनमें सुख होय और अनामिकामें छिद्र होयतो तरुणाईमें सुख होय,और मध्यमा प्रदेशिनीके बीचमें जो छिद्र होय तौ बालकपन में सुख होय ॥ १९६ ॥

विद्रुमरुचयःश्लक्ष्णाः पाणिनखाःकच्छपोन्नताः स्निग्धाः
सशिखाःक्रमेण विपुलाः पर्वार्द्धमिता महीशानाम्॥१९६

अन्वयः-(महीशानां पाणिनखाः विद्रुमरुचयः श्लक्ष्णाः कच्छपोन्नताः स्निग्धाः सशिखाः विपुलाः क्रमेण पर्वार्द्धमिता भवन्ति) अस्यार्थः-राजाओंके हाथोंके नख मूंगेकेसे रंग और चिकने कछुवेकीसी पीठके ढलाव चमकदार बडे बडे पोरुवेके आधेतक होतेहैं ॥१९६॥

दीर्घाः कुटिला रूक्षाः शुक्तनिभा यस्य करनखाविशि-
खाः॥तेजोमृजाविहीनाः सहीयते धान्यधनभोगैः १९७

अन्वयः–(यस्य पुरुषस्य करनखाः दीर्घाः कुटिलाः रूक्षाः शुक्तनिभाः तेजोमृजाविहीनाः विशिखाः भवन्ति स धनधान्यभोगैः हीयते) अस्यार्थः--जिस पुरुषके हाथके नख बड़े टेढे रूखे सफेद तेजकरिके स्वच्छतासे हीन चमत्काररहित ऐसे होयँ सो धन धान्यके भोगसे हीन होते हैं ॥ १९७ ॥

पुष्पयुतैर्दुःशीलाः श्वेतैः श्रमणास्तुषोपमैः क्लीबाः ॥
परतर्ककाविवर्णैश्चिपिटैःस्फुटितैर्नखैर्निःस्वाः॥१९८॥

अन्वयः–(पुष्पयुतैर्नखैःदुःशीला भवन्ति तथा श्वेतैःश्रमणास्तुषोपमैः क्लीबाः भवंति वा विवर्णैः परतर्ककाः चिपिटैः स्फुटितैःनिःस्वाः भवंति)अस्यार्थः–पुष्पयुक्तछींटेवाले नखोंसे दुःशील अर्थात् कुटिल स्वभावके होते हैं. और सफेद नखोंसे भिखारी होतेहैं और जिनके भुसीके बराबर नख होयँ वे नपुंसक होतेहैं,और बुरेरंगवाले नख पराई तर्क करनेवाले होतेहैं. और चिपटे टूटे फटे नखोंसे धनहीन अर्थात् दरिद्री होते हैं ॥ १९८ ॥

अपसव्यसव्यकरयोर्नखेषु सितबिंदवश्चरणयोर्वा ॥
आगन्तवः प्रशस्ताः पुरुषाणां भोजराजमतम् ॥१९९॥

अन्वयः–(पुरुषाणां अपसव्यसव्यकरयोः वा चरणयोर्नखेषु आगन्तवः सिताबिन्दवः प्रशस्ताः इति भोजराजमतम्) अस्यार्थः-- मनुष्योंके बायें वा दायें हाथके वा पांवके नखोंमें आये हुए सफेद बूंदवाले अच्छे होते हैं–यह भोजराजका मत है ॥ १९९ ॥

कच्छपपृष्ठो राजा हयपृष्ठो भोगभाजनं भवति ॥

धनसंपत्तिसुसेनाऽधिपतिः शार्दूलपृष्ठोपि ॥ २०० ॥

अन्वयः—(कच्छपपृष्ठः राजा भवति—हयपृष्ठः भोगभाजनं भवति—शार्दूलपृष्ठः अपि धनसंपत्तिसुसेनाधिपतिर्भवति) अस्यार्थः—कछुवेकीसी पीठके समान नखवाला राजा होय—और घोडेकीसी पीठके समान नखवाला भोगका पात्र अर्थात् भोगी होय और बघेरेकीसी पीठके समान नखवाला धन और संपत्ति युक्त सेनाका स्वामी होता है ॥ २०० ॥

लभते शिरालपृष्ठो निर्धनतां भुग्नवंशपृष्ठोपि ॥
कष्टं रोमशपृष्ठः पृथुपृष्ठो बन्धुविच्छेदम् ॥ २०१ ॥

अन्वयः—(शिरालपृष्ठः भुग्नवंशपृष्ठः अपि निर्धनतां लभते-रोमशपृष्ठः कष्टं लभते—पृथुपृष्ठः बंधुविच्छेदं लभते) अस्यार्थः—नसीली पीठवाला वा टेढीपीठवाला निर्धनताको पाताहै—और रोमयुक्त पीठवाला कष्ट अर्थात् दुःख पाताहै—और मोटी पीठवाला भाईयोंसे नाशको प्राप्त होता है ॥ २०१ ॥

नियतं कृकाटिका रोमाशिरासंयुता नृणां सा ॥
कुरुते कुटिला विकटा विसंकटा रोगदारिद्रयम् ॥ २०२

अन्वयः—(रोमशिरायुता कुटिला विकटा विसंकटा कृकाटिका यस्य भवति सा एव कृकाटिका नियतं नृणां रोगदारिद्र्यं कुरुते) अस्यार्थः—रोमभी हों नसेंभी हों टेढी ऊंची सकडी नारि और पीठकी संधि जिसकी ऐसी होय सोई कृकाटिका निश्चय मनुष्योंको रोग और दरिद्री करती है ॥ २०२ ॥

ह्रस्वग्रीवः शस्तो वृत्तग्रीवः सुखी धनी सुभगः ॥
कम्बुग्रीवस्तु भवेदेकातपवारणो नृपतिः ॥२०३॥

अन्वयः-(ह्रस्वग्रीवः शस्तः स्यात्-वृत्तग्रीवः सुखी धनी सुभगः स्यात्-कम्बुग्रीवः एकातपवारणो नृपतिर्भवति)अस्यार्थः-छोटी नारिवाला श्रेष्ठ होता है-और गोल नारिवाला सुखी धनवान् सुंदर होता है-तीन रेखावाली शंखकीसी नारिवाला एक छत्रधारी राजा होताहै ॥ २०३ ॥

महिषग्रीवः शूरो लम्बग्रीवोपि घस्मरः सततम् ॥
पिशुनो वक्रग्रीवः शस्तविनाशो महाग्रीवः स्यात् २०४

अन्वयः-(महिषग्रीवः शूरःस्यात्-लम्बग्रीवः अपि सततं घस्मरः स्यात् वक्रग्रीवः पिशुनः स्यात् महाग्रीवः शस्तविनाशः स्यात्)अस्यार्थः--भैंसेकीसी नारिवाला शूर अर्थात् योद्धा होय और लंबी नारिवाला निरंतर बहुत खानेवाला होय और टेढ़ी नारिवाला चुगली खानेवाला होय और बड़ी नारिवाला श्रेष्ठ बातको नाश करता है ॥ २०४ ॥

रासभकरभग्रीवो दुःखीस्याद्दांभिको बकग्रीवः ॥
शुष्कशिरालग्रीवाश्चिपिटग्रीवश्च धनहीनः ॥ २०५ ॥

अन्वयः-(रासभकरभग्रीवः दुःखी स्यात् बकग्रीवः दांभिकः स्यात्-चिपिटग्रीवः शुष्कशिरालग्रीवःच धनहीनःस्यात्) अस्यार्थः-गधा और ऊंटकीसी नारिवाला दुःखी होय और बगुलाकीसी नारिवाला पाखंडी होय और चपटी सूखीसी नसोंकी नारिवाला धनहीन होताहै ॥ २०५ ॥

पुण्यवतामिह चिबुकं वृत्तंमांसलमदीर्घलघुसंयुतंमृदुलं॥ अतिकृशदीर्घस्थूलं द्विधाग्रभागं दरिद्राणाम् २०६

अन्वयः-(इह पुण्यवतां चिबुकं वृत्तं मांसलं अदीर्घलघुमृदुलं

सुसंयुतं भवति तथा अतिकृशदीर्घस्थूलं द्विधाग्रभागं चिबुकं दरि
द्राणां भवति) अस्यार्थः—इस संसारमें पुण्यवानोंकी ठोडी गोल
मांससे भरी बड़ी न छोटी नरम सुडोल बनावटकी होती है और
पतली दुबली बड़ी और दो भागवाली अर्थात् गढ़ेलेदार ऐसी ठो
ड़ी दरिद्रियोंकी होती है ॥ २०६ ॥

हनुयुगलं सुश्लिष्टं चिबुकोभयपार्श्वसंस्थितं पुंसाम् ॥
दीर्घ चक्रं शस्तं पुनरशुभं भवति विपरीतम् ॥ २०७ ॥

अन्वयः—(पुंसां चिबुकोभयपार्श्वसंस्थितं हनुयुगलं दीर्घचक्रं
सुश्लिष्टं शस्तं पुनः विपरीतं अशुभं भवति) अस्यार्थः पुरुषकी
ठोड़ीके दोनों ओर स्थित दोनों जावड़े अच्छे प्रकार मिले हुए बड़े
और गोल श्रेष्ठ होतेहैं फिर वेही जो विपरीत होयँ तो अशुभ
होतेहैं ॥ २०७ ॥

कूर्चप्रलम्बमुज्ज्वलमस्फुटिताग्रं निरंतरं मृदुलम् ॥
स्निग्धं पूर्णं सूक्ष्मं मेचकं तु विशिष्यते पुंसाम् ॥ २०८ ॥

अन्वयः—(पुंसां प्रलंबं उज्ज्वलं अस्फुटिताग्रं निरंतरं मृदुलं
स्निग्धं पूर्णं सूक्ष्मं मेचकं कूर्चं विशिष्यते) अस्यार्थः—पुरुषके लंबे
निर्मल जिनकी नोंक फटी नहीं आगेसे केवल नरम चिकने पूरे
महीन काले चमकदार बाल हों तो अच्छे होतेहैं ॥ २०८ ॥

परदाररताश्चौराः श्मश्रुभिररुणैर्नटानखैः स्थूलैः ॥
रूक्षैः सूक्ष्मैः स्फुटितैः कपिलैः केशान्विता बहुशः २०९

अन्वयः—(अरुणैः श्मश्रुभिः परदाररताश्चौराः भवंति तथा स्थूलैः
रूक्षैः सूक्ष्मैः स्फुटितैः कपिलैः नखैः बहुशः केशान्विता नटा भवंति)
अस्यार्थः— लाल डाढ़ी मूछोंके पुरुष पराई स्त्रीके भोगनेवाले चोर

होते हैं—और मोटे रूखे पतले टूटे फटे कंजाकेसे रंगके नखोंसे बहुतसे बालों करियुक्त नट होतेहैं ॥ २०९ ॥

सांतर्द्वितीयदशमिह शुक्रोद्वयेकोधिकः क्रमेण नृणाम
तदयं श्मश्रुभेदस्तद्विकृतिः षोडशे वर्षे ॥ २१० ॥

अन्वयः–(नृणां क्रमेण तदयं श्मश्रुभेदः सांतर्द्वितीयदशं द्व्येकोधिक इह शुक्रो भवेत्—चपुनः षोडशे वर्षे तद्विकृतिः स्यात्) अस्यार्थः—मनुष्योंको क्रम करिके मूछोंका भेदहै—सो बीस वर्षके भीतर वा२१वर्षके भीतर जो मूछें निकलें तो वीर्यको उत्पन्नता करनेवाली होती हैं और जो सोलह वर्षके भीतर निकलें तो वीर्यको रोग करनेवाली होती हैं ॥ २१० ॥

सुखिनः समुन्नतैः स्युः परिपूर्णा भोगयुतांश्चमांसयुतैः॥
सिंहद्विपेन्द्रतुल्यैर्गंडैर्नराधिपा नरा धन्याः ॥ २११ ॥

अन्वयार्थौः–(समुन्नतैः गंडैः नराः सुखिनो भवंति) ऊँचे गंडस्थल होनेसे मनुष्य सुखी होतेहैं—और (मांसयुतैः गंडैः परिपूर्णा भोगयुताः स्युः) मांसके भरे गंडस्थलसे भरे पूरे भोगी होते हैं और (सिंहद्विपेन्द्रतुल्यैः गंडैः धन्याः नराः नराधिपाः स्युः) सिंह वा हाथीके समान गंडस्थल होनेसे उत्तम पुरुष राजा होते हैं ॥ २११ ॥

निम्नौ यस्य कपोलौ निर्मांसौ स्वल्पकूर्चरोमाणौ ॥
पापास्ते दुःखजुषो भाग्यविहीनाः परप्रेष्याः ॥ २१२॥

अन्वयः–(यस्य कपोलौ निम्नौ निर्मांसौ स्वल्पकूर्चरोमाणौ ते पापाः दुःखजुषः भाग्यविहीनाः परप्रेष्याः भवंति) अस्यार्थः—जिसके कपोल नीचे मांसरहित छोटी मूछेंवाले और रोमों करिके युक्त होयँ वे पापी दुःख पानेवाले अभागी और पराये दूत अर्थात् नौकर होते हैं ॥ २१२ ॥

समवृत्तमवलं सूक्ष्मं स्निग्धं सौम्यं समं सुरभि वदन
सिंहेभनिभं राज्यं संपूर्णं भोगिनां चेति ॥ २१३ ॥

अन्वयार्थौः-(यस्य वदनं समवृत्तं अवलं सूक्ष्मं स्निग्धं सौम्यं स सुरभि सिंहेभनिभं राज्यं स्यात्) जिसका मुख सब ओरसे गो डरावना नहीं छोटा चिकना दर्शनीय अर्थात् देखने योग्य बरा सुगंध लिये सिंह और हाथीके तुल्य होय सो राज्य करनेवा होता है और (च पुनः संपूर्णं भोगिनामपि भवति) संपूर्ण भोगि योंकाभी ऐसाही मुख होता है ॥ २१३ ॥

जननीमुखानुरूपं मुखकमलं भवति यस्य मनुजस्य
प्रायो धन्यः स पुमानित्युक्तमिदं समुद्रेण ॥ २१४

अन्वयः-(यस्य मनुजस्य मुखकमलं जननीमुखानुरूपं भवति स पुमान् प्रायः धन्यो भवति समुद्रेण इदमिति उक्तं) अस्यार्थः- जिस मनुष्यका मुखकमल माताके मुखकासा होय सो पुरुष बहुध करिके धन्य होता है यह समुद्रने इस प्रकार कहाहै ॥ २१४ ॥

दौर्भाग्यवतां पृथुलं पुंसां स्त्रीमुखमपत्यरहितानाम् ।
चतुरस्रं धूर्तानामतिह्रस्वं भवति कृपणानाम् ॥ २१५

अन्वयार्थौः-(दौर्भाग्यवतां पुंसां मुखं पृथुलं भवति) अभा पुरुषोंका मुख चौड़ा भाडसा होता है और (अपत्यरहितानां स्त्रीमुख भवति) संतान रहित पुरुषोंका मुख स्त्रीकासा होताहै और (धूर्ता नां मुखं चतुरस्रं भवति) दगाबाज मायावी पुरुषोंका मुख चौकोर होता है और (कृपणानां मुखं अतिह्रस्वं भवति) लोभी औ कंजूषोंका मुख बहुत छोटा होता है ॥ २१५ ॥

भीरुमुखं पापानां निम्नं कुटिलं च पुत्रहीनानाम् ॥
दीर्घं निर्द्रव्याणां भाग्यवतां मंडलं ज्ञेयम् ॥ २१६ ॥

अन्वयार्थौः–(पापानां भीरु मुखं भवति) पापियोंका डरावना मुख होता है और (पुत्रहीनानां मुखं निम्नं च पुनः कुटिलं भवति) पुत्रहीनोंका मुख नीचा और टेढा होता है और (निर्द्रव्याणां मुखं दीर्घं भवति) धनहीनोंका मुख लंबा होता है और (भाग्यवतां मुखं मंडलं ज्ञेयं) भाग्यवानोंका मुख गोल होता है ॥ २१६ ॥

रासभकरभप्लवगव्याघ्रमुखा दुःखभागिनः पुरुषाः ॥
जिह्ममुखा विकृतमुखाःशुष्कमुखाहयमुखानिःस्वाः ॥

अन्वयार्थौः–(रासभकरभप्लवगव्याघ्रमुखाः पुरुषाः दुःखभागिनो भवंति) गधा ऊंट बंदर बघेरेकेसे मुखवाले पुरुष दुःख भोगनेवाले होते हैं और (जिह्ममुखा विकृतमुखाः शुष्कमुखा हयमुखा निःस्वाः भवन्ति) टेढे मुख बुरे मुख सूखे घोडेकेसे मुखवाले दरिद्री होते हैं ॥ २१७ ॥

बिम्बाधरो धनाढ्यः प्रज्ञावान् पाटलाधरो भवति ॥
प्रायोराज्यं लभते प्रवालवर्णाधरस्तु नरः ॥२१८॥

अन्वयार्थौः–(बिम्बाधरः धनाढ्यः स्यात्) कुँदरुकेसे लाल रंगके होठवाला धनवान् होताहै और (पाटलाधरः प्रज्ञावान् स्यात्) गुलाबकेसे होठवाला बुद्धिवान् होताहै और (प्रवालवर्णाधरः नरः प्रायः राज्यं लभते) मूंगेके रंगकीसी चमकदार होठवाला पुरुष निश्चय राज्यको पाताहै ॥ २१८ ॥

यस्याधरोत्तरोष्ठौ द्व्यंगुलमानौ सुकोमलौ मसृणौ ॥
मृदुसममसृक्काणौ सजायते प्रायशो धनवान् ॥२१९॥

अन्वयः--(यस्य अधरोत्तरोष्ठौ द्व्यंगुलमानौ सुकोमलौ मसृ मृदुसममसृक्कार्णौ प्रायशः स धनवान् जायते) अस्यार्थः-जिस होठ ऊपर नीचेके नापमें दोअंगुलके नरमाई लिये और चिक बराबर किनारेके होयँ सो बहुधा धनवान् होताहै ॥ २१९ ॥

पीनोष्ठःसुभगःस्याल्लंबोष्ठो भोगभाजनं मनुजः ॥
अतिविषमोष्ठोभीरुर्लघ्वोष्ठो दुःखितो भवति ॥२२०॥

अन्वय.थौः--(पीनोष्ठः सुभगःस्यात्) मोटे होठवाला अच्छे चलनका होताहै और (लम्बोष्ठः मनुजः भोगभाजनं स्यात्) लम्बे होठवाला मनुष्य भोगोंका पात्र होताहै और (अतिविषमोष्ठः भीरु स्यात्) बहुत छोटे बड़े होठोंवाला डरपोकना होता है और(लघ्वोष्ठ दुःखितो भवति) छोटे होठवाला दुःखी होता है ॥ २२० ॥

रूक्षैःकृशैर्विवर्णैःप्रस्फुटितैः खंडितैरतिस्थूलैः ॥
ओष्ठैर्धनसुखहीना दुःखिनः प्रायशः प्रेष्याः ॥२२१॥

अन्वयः--(रूक्षैः कृशैर्विवर्णैः प्रस्फुटितैः खंडितैः अतिस्थूलैः ओष्ठैः धनसुखहीनाः दुःखिनः प्रायशः प्रेष्याः भवन्ति) अस्यार्थः-- रूखे पतले बुरे रंगके फटे हुए खंडित और मोटे होठोंसे धन और सुखसेहीन और दुःखी बहुधा ऐसे दूत अर्थात् हरकारे होते हैं२२१

कुंदमुकुलोपमाः स्युर्यस्यारुणपीडिकाः समाःसुघनाः
दशनाःस्निग्धाः श्लक्ष्णास्तीक्ष्णादंष्ट्राःसवित्ताढ्यः २२२

अन्वयः--(यस्य दशनाः कुंदमुकुलोपमाः अरुणपीडिकासमा सुघनाः स्निग्धाः श्लक्ष्णाः सुतीक्ष्णा दंष्ट्राः स्युः स वित्ताढ्यः भवति) अस्यार्थः--जिसके दाँत कुंदकी कलीके तुल्य या लाल फुंसीके समान बहुत घने चिकने स्वच्छ और तेज डाढों युक्त होयँ सो धनवान् होता है ॥ २२२ ॥

धनिनः खरद्विपरदा निःस्वाभल्लूकवानराःस्युरदाः॥
निंद्याः करालविरलद्विपंक्तिशितिविषमरूक्षरदाः २२३

अन्वयार्थौ–(खरद्विपरदाः धनिनो भवन्ति) गधे और हाथीकेसे लंबे दांतवाले धनी होते हैं और (भल्लूकवानराः रदाः निःस्वा भवन्ति) रीछ और बंदरकेसे दांतवाले दरिद्री होते हैं और (करालविरलद्विपंक्तिशितिविषमरूक्षरदाः निंद्याः स्युः) भयंकर और जुदे जुदे काले ऊंचे नीचे दांतवाले निंदक अर्थात् बुराई करनेवाले होते हैं॥ २२३॥

द्वात्रिंशतानरपतिर्दशनैस्तैरेकविरहितैर्भोगी॥
स्यात्त्रिंशतातनुधनोऽष्टाविंशत्या सुखी पुरुषः॥ २२४॥

अन्वयार्थौ–(द्वात्रिंशता दशनैः पुरुषः नरपतिर्भवति) बत्तीस दांतवाले पुरुष राजा होते हैं और (एकविरहितैः तैः दशनैः भोगीस्यात्) जो वेही दांत ३१ होयँ तो भोगी होय और (त्रिंशता दशनैः तनुधनः स्यात्) ३० दांतवाला थोड़े धनवाला होय और (अष्टाविंशतिदशनैः सुखीस्यात्) २८ दांतवाला सुखी होता है॥ २२४॥

दारिद्र्यदुःखभाजनमेकोनत्रिंशता सदा दशनैः॥
ऊर्द्ध्वमधस्तैरपि विहीनसंख्यैर्नरो दुःखी॥ २२५॥

अन्वयार्थौः–(एकोनत्रिंशता दशनैः सदा दारिद्र्यदुःखभाजनं भवति) २९ दांतवाला सदा दरिद्री और दुःखका भाजन होताहै और (उर्द्ध्व अधः तैः विहीनसंख्यैः दशनैः स पुरुषः दुःखी स्यात्) ऊपर नीचेसे वेही दाँत संख्यासे कमती होयँ सो पुरुष दुःखी होता है॥ २२५॥

स्यातांद्विजावधः प्राक् द्वादशगे मासि राजदन्ताख्यौ ।
शस्तावूर्द्ध्वावशुभौ जन्मन्येवोद्गतौ तद्वत् ॥ २२६ ॥

अन्वयार्थौः-(द्विजाः द्वादशगे मासि प्राक् अधः स्यातां तो राजदन्ताख्यौ शस्तौ) १२ महीनेके भीतर नीचेके जो दाँत निकलें तो राजदन्त कहावें ये शुभहैं और (ऊर्द्धौ अशुभौ) जो ऊपरके निकलें तो अशुभहैं और (तद्वत् जन्मनि एव उद्गतौ अशुभौ) जो एक साथ जन्मसेही निकलें तो वेभी अशुभहैं ॥२२६॥

सर्वे भवन्ति दशनाः पूर्णे वर्षद्वयेजनिप्रभृति ॥
आसप्तमदशमान्तं नियतं पुनरुद्गमं यान्ति ॥ २२७ ॥

अन्वयार्थौः-(जनिप्रभृति वर्षद्वये पूर्णे सति सर्वे दशनाः भवन्ति) जन्मसे लेकर दो वर्षतक पूरे होनेपर सब दाँत होतेहैं और(आसप्तमदशमांतं नियतं पुनः उद्गमं यान्ति) सातवीं वर्षसे दशवें वर्षके अंततक निश्चय फिर उत्पन्न होते हैं ॥ २२७ ॥

रसना रक्तादीर्घा सूक्ष्मा मृदुला तनु समा येषाम् ॥
मिष्टान्नभोजिनस्ते यदिवात्रैविद्यवक्तारः ॥ २२८ ॥

अन्वयार्थौः-(येषां रसना रक्ता दीर्घा सूक्ष्मा मृदुला तनु समा भवति ते मिष्टान्नभोजिनो भवन्ति) जिनकी जीभ लालवडी छोटी नरम पतली बराबर होय वे मीठेके खानेवाले होतेहैं-और (यदि वा त्रैविद्यवक्तारो भवन्ति) अथवा तीनों वेदोंके वक्ता अर्थात् कहनेवाले होतेहैं ॥ २२८ ॥

संकीर्णाग्रास्निग्धा रक्ताम्बुजपत्रसन्निभा रसना॥
न स्थूला नच पृथुला यस्य सपृथ्वीपतिर्मनुजः ॥२२९॥

अन्वयः-(यस्य रसना संकीर्णाग्रा स्निग्धा रक्ताम्बुजपत्रसन्निभा

नस्थूला नच पृथुला समनुजः पृथ्वीपतिर्भवति) अस्यार्थः--जिस मनुष्यकी जीभका आगेका भाग सँकडा होय और चिकना लाल कमलके फूलकी पंखडी अर्थात् पत्तेके समान न मोटी न चौडी होय सो मनुष्य पृथ्वीपति अर्थात् राजा होय ॥ २२९ ॥

शौचाचारविहीना सितजिह्वाः सततं भवन्ति नराः ॥
धनहीनाः शितिजिह्वाः पापोपगताःशबलजिह्वाः ॥२३०

अन्वयार्थौः--(सितजिह्वाः नराः सततं शौचाचारविहीना भवन्ति) सफेद जीभवाले मनुष्य शौच आचारसे सदा भ्रष्ट होतेहैं और (शितिजिह्वाः धनहीनाः भवंति)काली जीभवाले मनुष्य धनहीन होते हैं और (शबलजिह्वाः पापोपगताः स्युः) कबरी चित्र विचित्र रंगकी जीभवाले मनुष्य पापयुक्त होतेहैं ॥ २३० ॥

सूक्ष्मारूक्षापरुषास्थूलासमपृथुलामलसमन्वितायस्य
जिह्वा पीता सपुमान् मूर्खो दुःखाकुलः सततम् ॥२३१

अन्वयः--(यस्य जिह्वा सूक्ष्मा रूक्षा परुषा स्थूला समा पृथुला मल समन्वितापीता भवति स पुमान् मूर्खः सततं दुःखाकुलो भवति) अस्यार्थः--जिसकी जीभ पतली रूखी टेढी मोटी बराबर चौडी मलसंयुक्त पीली होय सो पुरुष मूर्ख और सदा दुःखमें व्याकुल रहताहै ॥ २३१ ॥

रक्ताम्बुज तालुदरो भूमिपतिर्विक्रमी भवति मनुजः ॥
वित्ताढ्यः सिततालुर्गजतालुर्मंडलाधीशः ॥ २३२ ॥

अन्वयार्थौः--(रक्ताम्बुजतालुदरो मनुजः विक्रमी भूमिपतिर्भवति) लाल कमल के समानजिसके तालुवेका बीच होय वह पुरुष पराक्रमी पृथ्वीका राजा होताहै और (सिततालुः वित्ताढ्यो भवति) सफेद

तालुवेवाला धनवान् होय और (गजतालुः मंडलाधीशः स्यात् हाथीकेसे तालुवेवाला मंडलका स्वामी होताहै ॥ २३२ ॥

रूक्षं शबलं परुषं मलान्वितं न प्रशस्यते तालु ॥
कृष्णं कुलनाशकरं नीलं दुःखावहं पुंसाम् ॥ २३३ ॥

अन्वयार्थौः—(रूक्षं शबलं परुषं मलान्वितं पुंसां तालु न प्रशस्यते) रूखा चित्र विचित्र टेढामलयुक्त पुरुषोंका तालुवा अच्छा नहीं होता है और (कृष्णं तालु कुलनाशकरं भवति) काला तालुवाला कुलके नाश करनेवाला होताहै और (नीलं तालु पुंसां दुःखावहं भवति) नीले तालुवेवाला पुरुष दुःखदेनेवाला होताहै ॥ २३३ ॥

अरुणतालुर्गुणयुक्तस्तीक्ष्णाग्रा घंटिका शुभास्थूला ॥
लम्बा कृष्णा कठिना सूक्ष्माचिपिटा नृणांनशुभा२३४

अन्वयार्थौः—(अरुणतालुः गुणयुक्तो भवति) लाल तालुवाला गुणवान्होताहै और (तीक्ष्णाग्रा नृणां घंटिका शुभा भवति) पैनी नोंककी मनुष्योंकी घाटी शुभ होतीहै और (स्थूला. लंबा कृष्णा कठिना सूक्ष्मा चिपिटा न शुभा भवति) मोटी लंबी काली कड़ी छोटी चपटी शुभ नहीं होती है ॥ २३४ ॥

हसितमलक्षितदशनं किञ्चिद्विकसितकपोलमतिमधुरम्॥पुंसांधीरमकंपं प्रायेणस्यात् प्रधानानाम् २३५॥

अन्वयः—(अलक्षितदशनं किंचिद्विकासितकपोलं अतिमधुरं धीरं अकंपं हसितं प्रायेण प्रधानानां पुंसां स्यात्) नहीं दीखें दांत जिसमें कुछ विकसितकपोल बहुत मीठा धीरजयुक्तकोपनेसे. रहित हँसना बहुधा प्रधान अर्थात् मुखिया पुरुषोंका होता है ॥ २३५ ॥

उत्कंपितांसकाशिरः संमीलितलोचनं निपतदश्रु ॥

विकृष्टस्वरमुद्धतं मध्यमानामसकृदंते स्यात् ॥ २३६ ॥

अस्यार्थः--कंपतेहैं कंधे और शिर जिस्में मुँदिगये हैं नेत्र और गिरते हैं आंसू जिसमें और मध्यम पुरुषोंका वारवार अंतमें भारी ऐसा अधिक हास्य होता है ॥ २३६ ॥

चतुरंगुलप्रमाणा स्थूलपुटांतस्तनुच्छिद्रा ॥
न च प्रपीनात्ववलिता चिरायुषां भोगिनां नासा २३७

अस्यार्थः--चार अंगुलके प्रमाण लंबी और मोटे नकुवे और भीतर छोटा छिद्र बहुत मोटी न होय और सुकडी न होय ऐसी नाक बडी आयुवाले भोगी पुरुषकी होती है ॥ २३७ ॥

उन्नतनासः सुभगो गजनासः स्यात्सुखी महार्थाढ्यः॥
ऋजुनासो भोगयुतश्चिरजीवी शुष्कनासः स्यात् २३८

अन्वयार्थौः--(उन्नतनासः सुभगः स्यात्) ऊंचीनाकवाला बहुत अच्छे चलनवाला होताहै और (गजनासः सुखी च पुनः महार्थाढ्यः स्यात्) हाथीकीसी नाकवाला सुखी और बहुत धनवान् होताहै और (ऋजुनासः भोगयुतः स्यात्) सीधी नाकवाला भोगयुक्त होताहै और (शुष्कनासः चिरजीवी स्यात्) सूखी नाकावला बहुत कालतक जीवताहै ॥ २३८ ॥

तिलपुष्पतुल्यनासः शुकनासो भूपतिर्मनुजः ॥
आढ्योग्रवक्रनासो लघुनासा शीलधर्मपरः ॥ २३९ ॥

अन्वयार्थौः--(तिलपुष्पतुल्यनासः च पुनः शुकनासः भूपतिर्मनुजः स्यात्) तिलके फूलके समान नाकवाला और तोतेकीसी नाकवाला मनुष्य राजा होताहै और (उग्रवक्रनासः आढ्यःस्यात्) उग्र और टेढी नाकवाला धनवान् होताहै और (लघुनासा शीलधर्म

परः स्यात्) छोटी नाकवाला गुणधर्म में तत्पर होताहै ॥ २३९

क्रमविस्तीर्णसमुन्नतनासा महीशितुर्भवति ॥
द्वेधास्थिताग्रभागातिदीर्घह्रस्वाचनिः स्वस्य॥२४०॥

अस्यार्थः—क्रमसे फैलीहुई उठी नाक राजाकी होती है और दो प्रकारसे जिसका आगेका भाग स्थित होय और बहुत लंबी अथवा बहुत छोटी नाकवाला दरिद्री होताहै ॥ २४० ॥

कुंचित्याचौर्यरतिर्नासिकया चिपिटया युवतिमृत्युः ॥
छिन्नानुरूपयास्यादगम्यरमणीरतः पापः ॥ २४१ ॥

अन्वयार्थौः—(कुंचित्यानासिकया चौर्यरतिर्भवति) सुकडी हुई नाकवाला चोरीमें प्रीति करनेवाला होताहै और (चिपिटया नासिकया युवतिमृत्युः स्यात्) चपटी नाकवालेकी स्त्रीसे मृत्यु होती है और (छिन्नानुरूपया नासिकया अगम्य रमणीरतः पापः स्यात्) कटीसी सूरतकी नाकवाला जिनसे भोग उचित नहीं तिनसे भोग करनेवाला पापी होताहै ॥ २४१ ॥

विकृतामध्यविहीना स्थूलाग्रापिच्छिलासा दुःखस्य॥
दक्षिणवक्रानासा अभक्ष्यभक्षकक्रूरयोर्ज्ञेया ॥ २४२ ॥

अन्वयार्थौः—(विकृता मध्यविहीना स्थूलाग्रा पिच्छिला नासा स दुःखस्य भवति) बुरी बीचमें हीन आगेसे मोटी और रपटनी ऐसी नाकवाला पुरुष दुःखी होताहै और (दक्षिणवक्रा नासा अभक्ष्यभक्षकक्रूरयोः ज्ञेया) दाहिनी ओरसे टेढी नाकवाला नहीं खाने योग्य वस्तु तिसके खानेवाला और क्रूर होताहै ॥ २४२ ॥

निर्ह्रादिसानुनासादसकृत्क्षुतं भोगिनां धनवतां द्विः ॥
दीर्घायुषां प्रयुक्तं सुसहितं त्रिभवंति पुंसाम् ॥ २४३ ॥

अन्वयार्थौः—(भोगिनां असकृत् सानुनासात् निर्द्रादिधनवतां द्विः क्षुतं भवति) भोगी पुरुषोंकी वारबार नाकसे शब्दवाली एक छींक होती है और धनवानोंकी दो छींक होती हैं और (दीर्घायुषां पुंसां सुसहितं प्रयुक्तं त्रिःक्षुतंभवति) बडी आयुवाले पुरुषोंकी एक साथ करी हुई तीन छींक होती हैं ॥ २४३ ॥

स्खलितं लघु च नराणां क्षुतं चतुर्भवति भोगवताम् ॥
ईषदनुनादसहितं करोति कुशलं निरंतरं पुंसाम् २४४

अन्वयार्थौः—(भोगवतां नराणां स्खलितं तथा लघु चतुः क्षुतंभवति) भोगी पुरुषोंकी कुछखाली कुछभरी और हलकी छींक होतीहै और (ईषदनुनादसहितं क्षुतं पुंसां निरंतरं कुशलं करोति) थोडे शब्दयुक्त जो छींक है सो पुरुषोंको निरंतर कुशलकरे है अर्थात् मंगलकारी होती है ॥ २४४ ॥

अक्षिणीनिर्मलनीलस्फटिकारुणमये ईषत् स्निग्धे ॥
स्यातामंतर्मेचककृशान्तशोणेदृशौ धनिनः ॥ २४५ ॥

अस्यार्थः—जिस पुरुषके दोनों नेत्र निर्मल और नीले स्फटिककेसे रंगके लाल युक्त कुछ चिकने चमकदार बीचमें काले और छोटे हैं अंत जिनके लाल ऐसे नेत्र धनवानोंके होते हैं॥२४५॥

हरितालाभैर्नयनैर्जायन्ते चक्रवर्तिनो नियतम् ॥
नीलोत्पलदलतुल्यैर्विद्वांसो मानिनो मनुजाः॥२४६॥

अन्वयार्थौः—(हरितालाभैर्नयनैः मनुजाः नियतं चक्रवर्तिनो जायन्ते) हरतालके रंगके नेत्रवाले पुरुष निश्चय चक्रवर्ती होते हैं और (नीलोत्पलदल तुल्यैःनयनैः मनुजाः मानिनः विद्वांसो भवंति) नीलकमलके दलके समान नेत्रवाले पुरुष गर्ववाले और पंडित होते हैं ॥ २४६ ॥

लाक्षारुणैर्नरपतिर्नयनैर्मुक्तासितैः श्रुतज्ञानी ॥
भवति महार्थःपुरुषो मधुकांचनलोचनैःपिङ्गैः॥२४७॥

अन्वयार्थौः–(लाक्षारुणैः नयनैः नरपतिर्भवति)लाखकेसे लाल-रंगके नेत्रवाला राजा होता है और (मुक्तासितैः नयनैः श्रुतज्ञानी भवति) मोतीकेसे सफेद रंगके नेत्रवाला शास्त्रज्ञानी होता है और (पिङ्गैः मधुकांचनलोचनैः पुरुषः महार्थो भवति) पीले और शहद सोनेकेसे रंगके नेत्रवाला पुरुष बहुत धनवान् होता-है ॥ २४७ ॥

सेनापतिर्गजाक्षश्चिरजीवीजायतेसुदीर्घाक्षः ॥
भोगी विस्तीर्णाक्षः कामीपारावताक्षोपि ॥ २४८ ॥

अन्वयार्थौः–(गजाक्षः सेनापतिः स्यात्) हाथीकेसे नेत्रवाला सेनापती होता है और (सुदीर्घाक्षः चिरजीवी जायते) बहुत बडे नेत्रवाला बहुत समयतक जीवे है और (विस्तीर्णाक्षः भोगी स्यात्) लम्बे चौडे नेत्रवाला भोगी होता है और (पारावताक्षः अपि कामी स्यात्) कबूतरकेसे नेत्रवाला कामी होता है ॥ २४८ ॥

श्यावदृशां सुभगत्वं स्निग्धदृशां भवति भूरिभोगित्वम्।
स्थूलदृशां धीमत्त्वं दीनदृशां धनविहीनत्वम् ॥ २४९॥

अन्वयार्थौः–(श्यावदृशां सुभगत्वं भवति) धूमले नेत्रवाला अच्छा होता है और (स्निग्धदृशां भूरिभोगित्वं भवति) चिकने नेत्रवाला बडा भोगी होता है और (स्थूलदृशां धीमत्त्वं भवति) मोटे नेत्रवाला बुद्धिमान् होता है और (दीनदृशां धनविहीनत्वं भवति) दीन दृष्टिवाला धनहीन होताहै ॥ २४९ ॥

नकुलाक्षमयूराक्षा जायन्ते जगति मध्यमाः पुरुषाः।

अधमा मण्डूकाक्षाः काकाक्षा धूसराक्षाश्च ॥ २५० ॥

अन्वयार्थौः—(नकुलाक्षमयूराक्षाः पुरुषाः जगति मध्यमाः जायन्ते) नौला और मोरकेसे नेत्रवाले पुरुषको जगत्में मध्यम कहते हैं और (मंडूकाक्षाः तथा काकाक्षाः धूसराक्षाः अधमा जायन्ते) मेंडक और कउवे और धूसरके रंगकेसे नेत्रवाले अधम होते हैं ॥ २५० ॥

बहुवयसो धूम्राक्षाः समुन्नताक्षा भवन्ति तनुवयसः ॥
विष्टब्धवर्तुलाक्षाः पुरुषा नातिक्रामन्तितारुण्यम् २५१

अन्वयार्थौः—(धूम्राक्षाः बहुवयसो भवंति) धूमले नेत्रवाले बहुत-आयुके होते हैं और(समुन्नताक्षाः तनुवयसो भवंति) झुकीसी आंखवाले थोडी आयुके होते हैं और (विष्टब्धवर्तुलाक्षाः पुरुषाः तारुण्यं नातिक्रामन्ति) एंठे अकडे और गोल नेत्रवाले पुरुष तरुणाई नहीं उलाँघते अर्थात् तरुणाईके पहलेही मरजातेहैं ॥ २५१ ॥

ऋजु पश्यति सरलमनाः पश्यंत्यूर्ध्वं सदैव पुण्याढ्याः
पश्यत्यधः सपापस्तिर्यक्पश्यति नरः क्रोधी ॥२५२॥

अन्वयार्थौः—(सरलमनाः ऋजु पश्यति) सूधे मनवाला सीधा देखता है और पुण्याढ्याः सदैव ऊर्ध्वं पश्यंति) पुण्यवान् सदा ऊपरको देखते हैं और (सपापः अधः पश्यति) पापी नीचेको देखताहै और(क्रोधी नरः तिर्यक् पश्यति) क्रोधी मनुष्य तिरछा देखताहै२५२

सततमबद्धो लक्ष्म्या विघूर्णते कारणं विना दृष्टिः ॥
यस्य म्लाना रूक्षा सपापकर्मा पुमान् नियतम् २५३

अन्वयार्थौः—(यस्य दृष्टिः कारणं विना विघूर्णते स सततं लक्ष्म्या अबद्धो भवति) जिसकी दृष्टि विनाप्रयोजन घूमे सो पुरुष सदा

लक्ष्मी हीन होताहै और (यस्य दृष्टिः म्लाना रूक्षा स पुमान् निय
पापकर्मा भवति) जिसकी दृष्टि मैली और सूखीसी होय सो पुरु
निश्चय पाप कर्म के करनेवाला होताहै ॥ २५३ ॥

अंधः क्रूरः काणः काणादपि केकरो मनुजात् ॥
काणात्केकरतोपि क्रूरतरः कातरो भवति ॥ २५४

अन्वयार्थौः–(अंधः काणः क्रूरो भवति) अंधा और काणा क्रू
होताहै और (काणात् अपि मनुजात् केकरः क्रूरो भवति)काणेसे
अधिक दृष्टि फेरनेवाला मनुष्य क्रूर होताहै और (काणात् केकरत
अपि कातरः क्रूरतरो भवति) काणे और दृष्टि फेरनेवालेसे अधि
आँख चुरानेवाला बड़ा क्रूर अर्थात् खोटा होताहै ॥ २५४ ॥

अहि दृष्टिःस्याद्रोगी बिडालदृष्टिः सदा पापः ॥
दुष्टो दारुणदृष्टिः कुक्कुटदृष्टिः कलिप्रियो भवति २५५

अन्वयार्थौः–(अहिदृष्टिः रोगी स्यात्) सर्पकीसी दृष्टिवाला रोगी
होताहै और (बिडालदृष्टिः सदा पापः स्यात्) बिड़ालकीसी दृष्टि
वाला सदा पापी होय और (दारुणदृष्टिः दुष्टः स्यात्) भयकारी
दृष्टिवाला दुष्ट होताहै और (कुक्कुटदृष्टिः कलिप्रियो भवति
मुरगेकेसी दृष्टिवाला लड़ाका अर्थात् लड़ाई करनेवाला होता
है ॥ २५५ ॥

अतिदुष्टा घूकाक्षा विषमाक्षा दुःखिताः परिज्ञेयाः ॥
हंसाक्षा धनहीना व्याघ्राक्षाः कोपना मनुजाः॥२५६॥

अन्वयार्थौः–(घूकाक्षा अतिदुष्टाः भवंति) उल्लूकीसी आँखवाले
बड़े दुष्ट अर्थात् दुःख देनेवाले होतेहैं और विषमाक्षाः दुःखिता
परिज्ञेयाः) छोटी बड़ी आँखेंवाला दुःखी जानना और (हंसाक्षाः ध

नहीनाः भवंति) हंसकीसी आँखेंवाले दरिद्री होतेहैं और (व्याघ्राक्षाः मनुजाः कोपनाः भवंति) बघेरेकीसी आँखेंवाले पुरुष क्रोधी होते हैं ॥ २५६ ॥

नियतं नयनोद्धारः पुंसामत्यन्तकृष्णताराणाम् ॥
भूरिस्निग्धदृशां पुनरायुःस्वल्पं भवेत् प्राज्ञः॥२५७॥

अन्वयार्थौः–(अत्यन्तकृष्णताराणां पुंसां नियतं नयनोद्धारो भवति) बहुत काली आँखके तारेवाले मनुष्यकी आँखें निश्चय निकाली जायँ अर्थात् आँखें बनाई जायँ और (भूरिस्निग्धदृशां पुंसां आयुः स्वल्पं पुनः प्राज्ञः भवेत्) बहुत चिकनी आँखवाले पुरुषकी आयु थोडी होतीहै फिरभी पंडित होय ॥ २५७ ॥

अतिपिङ्गलैर्विवर्णैर्विभ्रान्तैर्लोचनैश्चलैरशुभः ॥
अतिहीनारुणरूक्षैः सजलैःसमलैर्नरा निःस्वाः॥२५८॥

अन्वयार्थौः–(अतिपिंगलैः विवर्णैः विभ्रान्तैः चलैर्लोचनैः नरो अशुभः भवति) बहुत कंजे और बुरे रंगकेसे फिरते हुये चलायमान नेत्रोंसे पुरुष अशुभ होता है और (अतिहीनारुणरूक्षैः सजलैः समलैः लोचनैः नराः निःस्वाः भवन्ति) बहुतहीन छोटे लाल रूखे जलसे भरे मैलसहित नेत्रवाले पुरुष दरिद्री होते हैं ॥ २५८ ॥

इह वदनमर्द्धरूपं वपुषो यदि वा समनुरूपमिदम् ॥
तत्रापि वरा नासा ततोपि मुख्ये दृशौ पुंसाम्॥२५९॥

अन्वयः–(इह वपुषः अर्द्धरूपं वदनं यदि वा इदं समनुरूपं तत्रापि नासा वरा ततः अपि पुंसां मुख्ये दृशौ भवतः) अस्यार्थः–इस शरीरमें आधा रूप तो मुख है–और यह मुख बराबर और भारी तिस मुखसेभी नाक श्रेष्ठ है–और नाकसेभी पुरुषोंके मुख्य नेत्र होते हैं ॥ २५९ ॥

सुदृढैः कृष्णैर्नयनच्छेदस्थितैः पक्ष्माभिर्घनैः सूक्ष्मै
सौभाग्यं चिरमायुर्लभते मनुजो धनेशत्वम्॥२६

अन्वयः–(मनुजः सुदृढैः कृष्णैः नयनच्छेदस्थितैः सूक्ष्मैः घ
पक्ष्मभिः चिरं आयुः धनेशत्वं सौभाग्यं लभते) अस्यार्थः–मनु
ऐसे दृढसहित काले नेत्रोंके छेदोंमें स्थित पतले घने बन्नीवाले ब
कालकी आयु और धनका स्वामी और अच्छा भाग्य पाताहै२६

पक्ष्मभिरधमाविटलैः पिङ्गैः स्थूलैर्विवर्णैश्च ॥
पक्ष्मततिविरहिताः पुनरगम्यनारीरताःपापाः॥२६१

अन्वयार्थौः–(विटलैः पिंगैः स्थूलैः विवर्णैः पक्ष्मभिः अधम
भवन्ति) बिगडी और पीली मोटी बुरी रंगकी ऐसी बन्नी वाले पु
अधम होते हैं और (पुनः पक्ष्मततिविरहिताः पुरुषाः अगम्यनारी
रताः पापाः भवंति) फिर बन्नीकी पंक्ति रहित पुरुष जो स्त्री भोग
योग्य नहीं तिन स्त्रियोंके भोगी और पापी होते हैं ॥ २६१ ॥

अनिमेषो रहितः पुरुषः स्यादेकमात्रानिमेषोपि ॥
नियतं द्विमात्रनिमेषः परजन्माश्रित्यजीवति सः२६

अन्वयार्थौः–(अनिमेषः एकमात्रानिमेषः अपि पुरुषः रहित
स्यात्) जिसमें एक मात्राके लगनेसे जितना समय लगे उतनेमें व
पुरुष अनिमेषरहित होते हैं और (द्विमात्रनिमेषः सः पुरुषः निय
परजन्माश्रित्य जीवति) दो मात्राके बोलनेमें जितना समय ल
उतने समयतक वह पुरुष निश्चय दूसरे मनुष्यके जन्मके आसरे
रहे ॥ २६२ ॥

धनिनस्त्रिमात्रनिमेषास्तथा चतुर्मात्रनिमेषवंतोपि॥
न तु पंचमात्रनिमेषाश्चिरायुषो भोगिनो धनिनः २६३

अन्वयार्थौः–(त्रिमात्रनिमेषाः तथा चतुर्मात्रनिमेषवंतः अ

धनिनो भवंति) तीन मात्रामें तथा चार मात्रामें जिसका जितना पलक लगे वे धनी होते हैं और (पंचमात्रं निमेषः चिरायुषः भोगिनः धनिनो नतु भवन्ति) जिसका पाँचमात्रामें पलक लगै वह बड़ी आयु और भोगी धनी नहीं होते हैं ॥ २६३ ॥

नयनं निमिषैरल्पैर्मध्यैर्दीर्घैश्च जायते पुंसाम् ।
आयुः स्वल्पं मध्यं सुदीर्घमथानुपूर्विकया ॥ २६४ ॥

अन्वयार्थौ-(पुंसां नयनं अल्पैः निमिषैः मध्यैर्दीर्घैः आयुः स्वल्पं जायते) जिनपुरुषोंके नेत्र थोड़े पलक लगनेवालेहों उनको आयु थोड़ी होती है और (चपुनः मध्यं सुदीर्घं अथ आनुपूर्विकया पुंसां आयुर्भवति) जो बहुत देरमें पलक लगनेवाले होयँ उनकी मध्यम आयु होती है इस क्रमसे आयु जाननी चाहिये ॥ २६४ ॥

जानुं प्रदक्षिणीकृत्य यावत् करो घंटिकां दत्ते ।
तदिदमिह समयमानं मात्राशब्देन निगदति ॥२६५॥

अन्वयः-(यावत् करः जानुं प्रदक्षिणीकृत्य घंटिकां,आदत्ते तदिदं इह समयमानं मात्राशब्देन निगदति) अस्यार्थः-जबतक हाथ जितनी देरमें जानुतक फिरकें आवै और गलेकी घैंटीको पकड़े उतनेही समयको मात्रा कहते हैं ॥ २६५ ॥

मन्दरमन्थानकमध्यमानजलराशिघोषगंभीरम् ॥
बालस्य यस्य रुदितं स महीमहीयान् संपालयति २६६

अन्वयः-(यस्य बालस्य रुदितं मंदरमंथानकमध्यमानजलराशि-घोषगंभीरं स महीमहीयान् संपालयति (अस्यार्थः-जिसबालकका रोना ऐसा जैसा मंदराचल पर्वतसे समुद्रके मथनेमें जो शब्दहुवा वैसा गंभीर होय सो पृथ्वीके राजाओंके पालनेवाला होताहै ॥ २६६ ॥

बाष्पाम्बु विनिर्मुक्तं स्निग्धमदीनरोदनं शस्तम् ॥
रूक्षं दीनं घर्घरमश्रु पुनर्दुःखदं पुंसाम् ॥ २६७ ॥

अन्वयार्थौ–(पुंसां विनिर्मुक्तं बाष्पाम्बु स्निग्धं अदीनं रोदनं श
पुरुषके छोडे हुए आंसू चिकने गरीबोंकेसे नहीं ऐसा रोनेवा
श्रेष्ठ होताहै और (पुनः रूक्षं दीनं घर्घरं अश्रु दुःखदं भवति) रू
गरीबीके जिसमें घर्घर शब्दके आंसू निकलें वह दुःखके देनेवा
होताहै ॥ २६७ ॥

बालेन्दुनते वित्तं दीर्घे पृथुलोन्नते श्यामे ॥
नासावंशविनिर्गतदले इव भ्रूदले दिशतः ॥ २६८ ॥

अन्वयः–(भ्रूदले बालेन्दुनते दीर्घे पृथुलोन्नते श्यामे इव नास
वंशविनिर्गतदले वित्तं दिशतः) अस्यार्थः–जिसकी दोनों भौं
बालचंद्रमाकीसी झुकीहुई बडी चौडी काली और नाकके वंश
पहलेही निकली ऐसी जो होंय तौ बहुत धनको देतीहैं ॥ २६८ ॥

नृणामयुते स्निग्धे मृदुतनुरोमान्विते भ्रुवौ शस्ते ॥
हीने स्थूले सूक्ष्मे खरपिङ्गलरोमके न शुभे ॥ २६९ ॥

अन्वयार्थौ–(नृणां भ्रुवौ अयुते स्निग्धे मृदुतनुरोमान्विते शस्ते
मनुष्योंकी भौं हैं मिलीनहोंय चिकनी और नरम छोटे रोमोंकरिके
युक्त होयतौ ऐसी श्रेष्ठ होतीहैं और (हीने स्थूले सूक्ष्मे खरपिंगल
रोमके न शुभे) हीन मोटी छोटी खरदरी पिंगल वर्णकीसी रो
वाली भौं हैं शुभ नहीं हैं ॥ २६९ ॥

ह्रस्वान्ता बहुदुःखानामगम्ययोषाजुषां च मध्यनताः ॥
स्तोकायुषामतिनता विषमाः खण्डा भ्रुवौ दरिद्रा
णाम् ॥ २७० ॥

अन्वयार्थौः-(बहुदुःखानां पुरुषाणां भ्रुवः खंडा ह्रस्वांता भवंति) बहुत दुःखी पुरुषोंकी भौंहके खंड अर्थात् टूक छोटे छोरवाले होते हैं और (अगम्ययोषाजुषां भ्रुवः खंडा मध्यनता भवंति) अगम्य स्त्रियोंके गमन करनेवालोंकी भौंहके टुकडे बीचमें झुके हुए होतेहैं और (स्तोकायुषां भ्रुवः खंडा अतिनताः भवंति) थोडी आयुवालोंकी भौंहके खंड बहुत झुकेहुए होतेहैं और (दरिद्राणां भ्रुवः खंडाः विषमाः भवंति) दरिद्रियोंकी भौंहके खंड ऊंचे नीचे होतेहैं ॥ २७० ॥

धनवन्तः सुतवन्तः शिखरैः पुरुषाः समुन्नतैर्विशदैः ॥
निम्नैः पुनर्भवन्ति द्रव्यसुखापत्यपरिहीनाः ॥ २७१ ॥

अन्वयार्थौः-(पुरुषाः विशदैः शिखरैः समुन्नतैः धनवन्तः सुतवन्तो भवन्ति) पुरुषोंकी अच्छी भौंह करिके ऊंची होयँ तो धनसंतान वाले होतेहैं और (पुनः निम्नैः शिखरैः द्रव्यसुखापत्यपरिहीनाः भवंति नीची भौंहवाले-धन सुख संतानसे रहित होतेहैं ॥ २७१ ॥

परिपूर्णकर्णपाली पिप्पलिकाद्यवयवः सुसंस्थानः ॥
लघुविवरो विस्तीर्णः कर्णः प्रायेण भूमिभुजाम् ॥२७२॥

अस्यार्थः-परिपूर्ण हैं कानके अंग जिसमें पिप्पलिकाको आदि लेकर जो अवयव अच्छी सुडौलके बनेहुए छोटे छेदवाले ऐसे बड़े कान बहुधा राजाओंके होतेहैं ॥ २७२ ॥

आद्यः प्रलम्बकर्णः सुखी स्वभावपीनमृदुकर्णः ॥
मतिमान्मूषककर्णश्चमूपतिः शङ्खकर्णः स्यात् ॥२७३॥

अन्वयार्थौः-(प्रलंबकर्णः स्वभावमृदुपीनकर्णः आद्यः सुखी स्यात्) लम्बे कान वाला स्वभाव करिके नरम-और मोटे कानोंसे पहलीही अवस्थामें सुखी होताहै और (मूषककर्णः मतिमान् भवेत्) मूसेकेसे कानवाला बुद्धिमान् होताहै और (शंखकर्णः चमूपतिः

स्यात्) शङ्ककेसे कानवाला सेनाका पति अर्थात् स्व
होताहै ॥ २७३ ॥

चिपिटश्रवणो भोगी दीर्घायुर्दीर्घरोमशः श्रवणः ॥
अतिपीनमहाभोगी श्रवणो जननायको भवति ॥२७४

अन्वयार्थौः–(चिपिटश्रवणः भोगी भवति) चिपकेसे कानवाला भोगी होताहै और (दीर्घरोमशः श्रवणः दीर्घायुर्भवति) रोमवाले कानोंसे बडी आयुवाला होताहै और (अतिपीनश्रव भोगी तथा जननायको भवति) बहुत मोटे कानवाला भोगी औ मनुष्योंका स्वामी होताहै ॥ २७४ ॥

ह्रस्वैर्निःस्वाः कर्णैर्निर्मांसैः पापमृत्यवो ज्ञेयाः ॥
व्यालंबिभिः शिरालैः क्रूराः स्यु प्रायशः कुटिलैः २७

अन्वयार्थौः–(ह्रस्वैः निर्मांसैः कर्णैः नराः निःस्वाः भवन्ति) छो मांसरहित कानवाले मनुष्य दरिद्री होतेहैं और (तथा पापमृत्य ज्ञेयाः) पापसे मरनेवाले होतेहैं और (व्यालंबिभिः शिरालैः कर्ण प्रायशः कुटिलैः क्रूराः स्युः) लम्बे और नसीले और कुटि अर्थात् टेढे कानवाले बहुधा क्रूर अर्थात् खोटे होतेहैं ॥ २७५ ।

येषां पृथुलाः क्षुद्राः कर्णाः स्युः कर्णशष्कुलीहीनाः ॥
स्वल्पायुषो दरिद्रा विलोक्यमाना विरूपास्ते ॥ २७६ ॥

अन्वयार्थौः–(येषां कर्णाः पृथुलास्ते पुरुषाः क्षुद्राः स्युः) जिनवे कान चौडे होयँ वे पुरुष ओछे अर्थात् नीच होतेहैं और (शष्कुली हीनाः कर्णाः स्वल्पायुषो भवंति) बीचकी नसों करिके हीन कान वाले थोडी आयुके होतेहैं और (ते पुरुषाः विलोक्यमाना विरूपा दरिद्रा भवन्ति) वे पुरुष देखनेमें कुरूप और दरिद्री होतेहैं ॥ २७६ ॥

विपुलमूर्द्धमधिकमुन्नतमर्द्धेन्दुसम्मितं राज्यम् ॥

प्रादिशत्याचार्यपदं शुक्तिविशालं नृणां भालम्॥२७७॥

अन्वयार्थौः–(नृणां भालं विपुलं ऊर्द्ध्वं अधिकं उन्नतं अर्द्धेन्दुसं-मितं राज्यं ददाति) मनुष्यका लिलार चौडा ऊंचा और बहुत ऊंचा आधे चंद्रमाके आकार होय तो राज्यके देनेवाला होता है और (शुक्तिविशालं नृणां भालं आचार्यपदं प्रादिशति) सीपीकासा चमकना और बड़ा मनुष्यका लिलार होय तो आचार्यपदके देने-वाला होता है ॥ २७७ ॥

स्वल्पैर्धर्मप्रवणा धनहीनाः संवृतैस्तथाविषमैः ॥
निम्नैः केवलबंधनवधभाजः क्रूरकर्माणः ॥ २७८ ॥

अन्वयार्थौः–(स्वल्पैः भालैः धर्मप्रवणा भवंति) छोटे लिलार-वाले धर्ममें तत्पर अर्थात् उदारचित्त होते हैं और (संवृतैः तथा विषमैः भालैः धनहीनाः भवन्ति) ढके वा औंधे तथा ऊंचे नीचे लिलारवाले धनहीन होते हैं और (निम्नैः भालैः केवलबंधनवध भाजः क्रूरकर्माणो भवंति) नीचे लिलारवाले केवल कैद मार इनके पानेवाले और क्रूरकर्म अर्थात् खोटे काम करनेवाले होते हैं ॥ २७८ ॥

भालस्थलस्थिताभिः सुशिराभिरधमाः सदैव पाप कराः ॥अभ्युन्नताभिराढ्यास्ताभिरपिस्वस्तिकाकृतिभिः ॥ २७९ ॥

अन्वयार्थौः–(भालस्थलस्थिताभिः सुशिराभिः रेखाभिः अधमाः सदैव पापकराः भवन्ति) लिलारमें स्थित नसों करिके जो रेखा होय तो नीच और सदा पाप करनेवाले होते हैं और (अभ्युन्नता-भिः तथा स्वस्तिकाकृतिभिःरेखाभिः अपि ताभिः आढ्याःभवन्ति) ऊंची और सांथियेके आकार उनही लिलारकी नसोंसे जो रेखा होय तो धनवान् अर्थात् धनाढ्य होते हैं ॥ २७९ ॥

रेखाभिर्वर्षशतं पञ्चभिरायुर्ललाटसंस्थाभिः ॥
पुरुषाणां स्त्रीणां वा कर्मकरत्वं करोति श्रीः ॥२८०॥

अन्वयार्थौः-(ललाटसंस्थाभिः पंचभिः रेखाभिः पुरुषाणां वा स्त्रीणां वर्षशतं आयुर्भवति) लिलारमें स्थित जो पाँच रेखा होयँ तो पुरुष वा स्त्रीकी सौवर्षकी आयु होतीहै और (श्रीःकर्मकरत्वं करोति) लक्ष्मी उनके कामके करनेवाली अर्थात् टहलनी होती है ॥ २८० ॥

भालस्थलस्थितेन स्फुटेन रेखाचतुष्टयेन नृणाम् ॥
वर्षाण्यशीतिरायुर्वसुधेशत्वं पुनर्भवति ॥ २८१ ॥

अन्वयार्थौः-(भालस्थलस्थितेन स्फुटेन रेखाचतुष्टयेन नृणां वर्षाणि अशीतिः आयुर्भवति) लिलारमें स्थित प्रकट चार रेखा करिके मनुष्यकी अस्सीवर्षकी आयु होती है और (पुनः वसुधेशत्वं भवति) और पृथ्वीका राजा होता है ॥ २८१ ॥

स्यादायुर्लेखाभिस्तिसृभिर्द्वाभ्यामथैकया नियतम् ॥
शरदां सप्ततिषष्टि चत्वारिंशदपि क्रमशः ॥ २८२ ॥

अन्वयार्थौः-(तिसृभिः रेखाभिः शरदांसप्ततिःभवति) तीन रेखा करिके तो ७० वर्षकी आयु होती है और (द्वाभ्यां रेखाभ्यां षष्टि भर्वति) दो रेखा करिके ६० वर्षकी आयु होती है और (एकया रेखया चत्वारिंशत् अपि क्रमशः नियतं आयुर्भवति) एक रेखा करिके ४० वर्षकी क्रमसे निश्चय आयु होती है ॥ २८२ ॥

भाले लेखाहीने पंचाधिकविंशतिसमाः ॥
आयुः स्याद्ध्रुवमखिला जायंते संपदः सपदि॥२८३॥

अन्वयार्थौ-(यदि भाले लेखाहीने सति पंचाधिकविंशतिसमाः

आयुः स्यात्) जो रेखारहित लिलार होयतौ २५ वर्षकी आयुहोय और (ध्रुवं अखिलाः सपदि संपदो जायन्ते) निश्चय संपूर्ण शीघ्रही संपदा होय ॥ २८३ ॥

यदि वा तिर्यग्दीर्घास्तिस्रो रेखाः शतायुषां भाले ॥
भूमिजुषां तु चतस्रः पुनरायुः पंचहीनशतम् ॥२८४॥

अन्वयार्थौः–(यदिवा शतायुषां भाले दीर्घा तिस्रः तिर्यक् रेखा भवंति) अथवा सौवर्षकी आयुवालोंके लिलारमें बड़ी तिरछीतीन रेखा होतीहैं और (पुनः भूमिजुषां तु चतस्रः पंचहीनशतं आयुर्भवति) फिर भूमिवालोंके लिलारमें वेही बड़ी तिरछी रेखा होंयतौ चार पांच कम सौवर्षकी आयु होतीहै ॥ २८४ ॥

जीवति वर्षाण्यशीतिः केशान्तोपगते रेखे ॥
भालेन वर्षनवतिः पुरुषो रेखाचितेन पुनः ॥ २८५ ॥

अन्वयार्थौः–(यदि केशान्तोपगते रेखे भवतः तर्हि वर्षाण्यशीतिः नरो जीवति)जो दो रेखा केशोंके अंततक जायतौ वह पुरुष८०वर्ष तकजीवेहै और (पुनर्भालेन रेखाचितेन पुरुषः वर्षनवतिर्जीवति) जो फिर अनेक रेखा करिके युक्त लिलार होयतौ वह पुरुष ९०वर्ष जीवेहै ॥ २८५ ॥

रेखाः सप्ततिरायुः पंचैताग्रस्थिताः पुनः षष्टिः ॥
बह्वयो नृणां शतार्द्धं दशोनमपि भंगुरा ददते॥२८६॥

अन्वयार्थौः–(यदि एताः पंच रेखा अग्रस्थिता भवंति तदा सप्तति र्वा षष्टिरायुर्भवति) जो वेही पांचरेखा आगेस्थित होंय तौ७०अथवा ६० वर्षकी आयुहोतीहै और (नृणां बह्वयः रेखा शतार्द्धं आयुः ददते) मनुष्योंके (बह्वयः)बहुत रेखा होंयतौ ५० वर्षकी आयुहोती

है और (यदि भंगुरा पंच रेखा भवंति तदा दशोनं अपि शता
आयुः ददते) जो वेही पांचरेखा टूटीफटी होंय तौ दशकमपचा
अर्थात् ४० वर्षकी आयु होतीहै ॥ २८६ ॥

भ्रूयुग्मोपगताभिस्त्रिंशद्वर्षाणि जीवति शरीरी ।
विंशत्यब्दानि पुनर्लेखाभिर्वा च वक्राभिः ॥ २८७ ॥

अन्वयार्थौः–(भ्रूयुग्मोपगताभिः रेखाभिः शरीरी त्रिंशद्वर्षाणि जीवति) दोनोंभौंहके ऊपर जो रेखा होंय तौ मनुष्य तीस वर्षतक जीवेहै और (पुनः वक्राभिः रेखाभिः विंशत्यब्दानि जीवति) फिर जो वेही टेढी रेखा होय तौ २० वर्ष जीवेहै ॥ २८७ ॥

छिन्नाभिरगम्यस्त्रीगामी क्षुद्राभिरपि नरोऽल्पायः ॥
रेखाभिर्मनुजः स्यादित्याह सुमंतविप्रेन्द्रः ॥ २८८ ॥

अन्वयार्थौः–(छिन्नाभिः रेखाभिः अगम्य स्त्रीगामीस्यात्) टूटी फटी रेखाओंसे मनुष्य, नहीं है गम्य जिसमें ऐसी स्त्रीसे भोग करने वाला होय और (क्षुद्राभिः रेखाभिः अपिनरः अल्पायुः स्यात) छोटी रेखाओंसे मनुष्य थोड़ी आयुवाला होताहै और (सुमन्त विप्रेन्द्र इत्याह रेखाभिर्मनुजः स्यात्) सुमंत नाम ब्राह्मणने मनुष्यकी ऐसी रेखाओंका यह फल कहाहै ॥ २८८ ॥

श्रीवत्सकार्मुकाद्या यस्य शिरारोमाभिः कृता भाले ।
रेखाभिर्वा नृपतिर्भोगी वा जायते सपदि ॥ २८९ ॥

अन्वयः–(यस्य भाले श्रीवत्सकार्मुकाद्याः शिरारोमभिः रेखाभिः कृता भवंति स नृपतिर्वा भोगि सपदि जायते) अस्यार्थः–जिसके लिलारमें नसों और रोमयुक्त रेखाओं करिके श्रीवत्स और धनुषको आदि लेकर चिह्न होंय सो पुरुष राजा और भोगी शीघ्रही होता है ॥ २८९ ॥

मस्तकमिभकुम्भनिभं भूमिभुजां मंडलं गवाद्यानाम् ॥
भोगवतां भवति समं क्रमोन्नतं मण्डलेशानाम् ॥ २९० ॥

अन्वयार्थौः–(भूमिभुजां मस्तकं इभकुंभनिभं भवति) राजाओंके मस्तक हाथीके मस्तकके तुल्य होते हैं और (गवाद्यानां मंडलं भवति) उनका गौ आदिका समूह होता है और (भोगवतां मस्तकं समं भवति) भोगनेवालोंका मस्तक बराबर होता है और (मंडलेशानां मस्तकं क्रमोन्नतं भवति) मंडलेशोंका मस्तक क्रम–करिके ऊंचा होता है ॥ २९० ॥

विकसच्छत्राकारं यस्य शिरो युवतिकुचनिभं वापि ॥
नृपतिःस सार्वभौमो निम्नं वा यस्य स महीशः ॥ २९१ ॥

अन्वयार्थौः–(यस्य शिरः विकसच्छत्राकारं वा युवतिकुचनिभं भवति स सार्वभौमः नृपतिर्भवति) जिसका मस्तक खुलेहुए छातेके आकार वा स्त्रीके कुचके आकार होय सो सर्वभूमिका राजा होता है और (यस्य शिरः निम्नं स महीशो भवति) जिसका मस्तक नीचा होय सो भूमिका राजा होता है ॥ २९१ ॥

विषमो धनहीनानां करोटिकाभश्चिरायुषो मूर्द्धा ॥
द्राघिष्ठो दुःखवतां चिपिटो मातृपितृघ्नानाम् ॥ २९२ ॥

अन्वयार्थौः–(धनहीनानां मूर्द्धा विषमो भवति) दरिद्रियोंका मस्तक ऊंच नीच होता है और (चिरायुषः मूर्द्धा करोटिकाभो भवति) बडी आयुवालेका मस्तक खोपडीके आकार होता है और (दुःखवतां मूर्द्धा द्राघिष्ठो भवति) दुःख पानेवालेका मस्तक बहुतही लम्बाहोता है और (मातृपितृघ्नानां मूर्द्धा चिपिटो भवति) माता पिताके मारनेवालेका मस्तक चिपटासा होताहै ॥ २९२ ॥

नविरहितो द्विमौलीः पापरतो मीनमौलिरतिदुःखी ॥
अधमरुचिर्घटमौलिर्घननतमौलिः सदा निन्द्यः॥२९३॥

अन्वयार्थौः—(द्विमौलिः धनविरहितः स्यात्) दो मस्तकवाला दरिद्री होता है और (मीनमौलिः पापरतः वा अतिदुःखी स्यात्) मछलीकेसे मस्तकवाला पाप करनेमें चाह रक्खे और बहुत दुःखी होता है और (घटमौलिः अधमरुचिः स्यात्) घडेकेसे मस्तकवाला नीचोंमें संगति करनेवाला होता है और (घननतमौलिः सदा निंद्यः स्यात्) कडे और झुके हुए मस्तकवाला सदा बुराईके योग्य होता है ॥ २९३ ॥

अत्रुटिताग्राः स्निग्धा ऋजवो मृदवःसमास्तनीयांसः ॥
अस्तोकदीर्घबहवस्तरङ्गिणो भुभूजां केशाः ॥ २९४ ॥

अन्वयः—(अत्रुटिताग्राः स्निग्धाः ऋजवः मृदवः समाः तनीयांसः अस्तोकदीर्घबहवः तरंगिणः भूभुजां केशाः भवंति) अस्यार्थः— नहीं टूटेहैं शिरे जिनके और चिकने सूधे नरम बराबर पतले बहुत लंबे और बहुत बलदार ऐसे बाल राजाओंके होते हैं ॥ २९४ ॥

ऊर्ध्वा रूक्षाः कपिलाः स्थूला विषमाः खरविभिन्नाग्राः॥
अतिह्रस्वदीर्घकुटिला जटिला विरला दरिद्राणाम् २९५

अन्वयः—(उर्ध्वाः रूक्षाः कपिलाःस्थूलाःविषमाः खरविभिन्नाग्राः अतिह्रस्वदीर्घकुटिलाः जटिला विरला दरिद्राणां भवंति) अस्यार्थः— ऊंचे रूखे भूरे मोटे ऊंचे नीचे खरदरे आगेसे शिरे फटे हुए बहुत छोटे बड़े टेढे बलदार मिले हुये जुदे जुदे ऐसे बाल दरिद्रियोंके होते हैं ॥ २९५ ॥

अंगं यद्यपि पुंसां स्त्रीणां वा पिशितविरहितं सूक्ष्मम ॥
परुषं शिरावनद्धं तत्तदनिष्टं परं ज्ञेयम् ॥ २९६ ॥

अन्वयः-(यद्यपि पुंसां अंगं वा स्त्रीणां अपि अंगं पिशितविरहितं सूक्ष्मं परुषं शिरावनद्धं तत्तत्परं अनिष्टं ज्ञेयम्) अस्यार्थः-जिन पुरुषोंका अंग वा स्त्रियोंका अंग मांसरहित पतला खरदरा चमकती हैं नसें जिसमें ऐसा अंग स्त्रीका हो परंतु पुरुषका बुराहै ॥ २९६ ॥

आयुःपरीक्षा पूर्वं नृणां लक्षणं तदा ज्ञेयम् ॥
व्यर्थं लक्षणज्ञानं लोके क्षीणायुषां यस्मात् ॥ २९७ ॥

अन्वयः-(नृणां आयुःपरीक्षा पूर्वं लक्षणं तदा ज्ञेयं यस्माल्लोके क्षीणायुषां लक्षणज्ञानं व्यर्थं भवति) अस्यार्थः-मनुष्योंकी आयु परीक्षा पूर्वक होय तौ वह लक्षणभी ठीकहै और जिस कारणसे लोकमें बहुत कमती आयुवालोंके लक्षण जाननेमें झूंठे होतेहैं ॥ २९७ ॥

यल्लक्ष्म पुनः शुभमपि करे रेखाप्रभृतिकं च संवदति ॥
बाह्याभ्यन्तरमपरं तत्र समुद्रेण निर्दिष्टम् ॥ २९८ ॥

अन्वयः-(यल्लक्ष्म शुभं अपि पुनः करे रेखाप्रभृतिकं च पुनः संवदति अपरं लक्षणं बाह्याभ्यंतरं तत्र समुद्रेण निर्दिष्टम् (अस्यार्थः-जो लक्षण शुभभीहैं और हाथकी रेखाओंका लक्षणभी कहताहै तिन दोनोंमें बाहिरी और भीतरी लक्षणोंको औरभी जानने चाहिये यह समुद्रने कहाहै ॥ २९८ ॥

इति महत्तमश्रीनरसिंहात्मजदुर्लभराजविरचितेतिलकापरनाम्नि नरस्त्रीलक्षणशास्त्रे शारीरिकाधिकारः प्रथमः ॥ १ ॥

संहतिसारानूकस्नेहोन्मानप्रमाणमानानि ॥
क्षेत्राणि प्रकृतिरथो मिश्रमेतदपि शारीरम् ॥ १ ॥

अन्वयः—(संहतिसारानूकस्नेहोन्मानप्रमाणमानानि क्षेत्राणि प्रकृति अपि एतत् मिश्रं शारीरम्) अस्यार्थः—बनावट जोड बल आचरण प्रीत उंचाई संख्या चौडाई आकार स्वभाव इनके मिलनेका नाम क्षेत्र और शरीरहै ॥ १ ॥

यत्र मिथः श्लिष्टत्वं मांसस्नाय्वस्थिसंधिबंधानाम् ॥
संहननं संघातः संहतिरिति कथ्यते सद्भिः ॥ २ ॥

अन्वयः—(यत्र मांसस्नाय्वस्थिसंधिबंधानां मिथः श्लिष्टत्वं संहननं संघातः इति सद्भिः संहतिः कथ्यते) अस्यार्थः—जहाँ मांस बडी बडी नसें और हाड जोडकी जगह बंधान आपसमें मिलना इसीका नाम संहनन और संघात है सत्पुरुष इसको संहति कहते हैं ॥२॥

यंत्रारिष्टमिवांगं प्रत्यंगं दृश्यते देहे ॥
संस्थानेन सुरूपं संहतिर्भवति सा महेच्छ ॥ ३ ॥

अन्वयः—(देहे यंत्रारिष्टं इव अंगं प्रत्यंगं दृश्यते संस्थानेन सुरूपं हे महेच्छसा संहतिर्भवति) अस्यार्थः—शरीरमें यंत्रकीसी भांति शुभ शुभ लक्षण अंगमें अंग दीखते हैं सोई बनावट करिके रूप होताहै हे महेच्छ अर्थात् महाशय सोई संहति होतीहै ॥ ३ ॥

मांसास्थिसन्धिबंधो ह्यशिथिलो हि लक्ष्यते यस्य ॥
सच संहतिमान् धन्यो दीर्घायुर्जायते नियतम् ॥ ४ ॥

अन्वयः—(यस्य मांसास्थिसन्धिबंधः अशिथिलः लक्ष्यते ससंहतिमान् नियतं धन्यः दीर्घायुर्जायते) अस्यार्थः—जिसका मांस हाड बंधान ढीले नहीं दीखें सो संहतिमान् ऐसे शरीरवाला निश्चय धन्य और बडी आयुवाला होताहै ॥ ४ ॥

संहतिरहितो रूक्षः पिशितविहीनः शिरायुतः शिथिलः॥
स्थूलास्थिसन्निवेशो भवति क्लेशावहः स पुमान् ॥ ५ ॥

अन्वयः–(यः पुरुषः संहतिरहितः रूक्षः पिशितविहीनः शिरायुतः शिथिलः स्थूलास्थिसन्निवेशः स पुमान् क्लेशावहः भवति) अस्यार्थः–जिस पुरुषका शरीर अच्छी बनावटका नहीं होय और रूखा मांस रहित थोड़े मांसका बड़ी बड़ी नसें दीखें और ढीला मोटे हाड़ होयँ जिसमें सो ऐसा पुरुष दुःख भोगनेवाला होताहै ॥ ५ ॥

अथ सारः ।

त्वग्रक्तमांसमेदोस्थिमज्जाशुक्राण्यनुक्रमेण नृणाम् ॥
साराः सप्त भवेयुः समासतस्तत्फलं ब्रूमः ॥ ६ ॥

अन्वयः–(अनुक्रमेण नृणां सप्त साराः भवेयुः त्वक्रक्तमांसमेदः अस्थि मज्जा शुक्रं समासतः तत्फलं वयं ब्रूमः) अस्यार्थः–क्रमसे मनुष्योंके७ सार होतेहैं-चर्म, रक्त, मांस,चर्बी, हाड़, मज्जा, वीर्य, सो संक्षेपसे उसका फल हम कहतेहैं ॥ ६ ॥

स्निग्धत्वचो बोधनाढ्यास्तनुत्वचः कुबुद्धयो मनुजाः॥
सुभगा मृदुत्वचः स्युः प्रागुक्तत्रित्वचः सुखिनः ॥ ७ ॥

अन्वयः–(स्निग्धत्वचः मनुजाः बोधनाढ्याः, तनुत्वचः मनुजाः कुबुद्धयः, मृदुत्वचः सुभगाः स्युः, प्रागुक्तत्रित्वचः सुखिनो भवन्ति) अस्यार्थः–चिकनी खालवाले मनुष्य ज्ञानवान् होते हैं–और पतली खालवाले मनुष्य खोटी बुद्धिके होतेहैं–और नरम खालवाले सुंदर होतेहैं–और पहले जो कहीगई तीन त्वचावालेभी सुखी होतेहैं ॥ ७ ॥

रसनोष्ठदन्तपीठकरांघ्रिगुदतालुलोचनान्तेन ॥
रक्तेन रक्तसारा धनतनयस्त्रीसुखोपेताः ॥ ८ ॥

अन्वयः-(रसनोष्ठदंतपीठकरांघ्रिगुदतालुलोचनान्तेन रक्ते
मनुजाः रक्तसाराः धनतनयस्त्रीसुखोपेताः भवंति) अस्यार्थः-जी
होठ मसूड़े हाथ पाँव गुदा तालुवा नेत्रोंके अंत जो ये सात ला
होयँ वे पुरुष रक्तसार कहातेहैं वे धन संतान स्त्री करिके युक्त सुख
होतेहैं ॥ ८ ॥

सर्वाङ्गीणेन चितो यथाप्रदेशं घनेन मांसेन ॥
उक्तः स मांससारो विद्याधनरूपपरिकलितः ॥ ९ ॥

अन्वयः-(यथाप्रदेशं घनेन सर्वाङ्गीणेन मांसेन चितः समांससा
उक्तः विद्याधनरूपपरिकलितो भवति) अस्यार्थः-जैसा जिस जग
चाहिये सब शरीरका मांस कड़े करिके जो पुरुष युक्त होय
मांससार कहिये वह विद्या धन रूप इन करिके युक्त होताहै ॥ ९

नखदन्तदृष्टिस्निग्धो मेदःसारः सुखान्वितः सुतवान्
स्थूलास्थिरस्थिसारः कान्तो विद्यां गतः सबलः॥१०

अन्वयार्थौ-(नखदन्तदृष्टिस्निग्धः मनुजः मेदःसारो भवति सुखा
न्वितः सुतवान् स्यात्) नख दाँत दृष्टि चिकने ऐसे जिस पुरुष
होयँ वह मेदसार कहाताहै वही सुखी और पुत्रवान् होताहै औ
(स्थूलास्थिरस्थिसारः मनुजः कान्तः विद्यांगतः सबलः स्यात्
मोटे हाडवाला अस्थिसार कहाताहै वह पुरुष और स्त्री विद्यावा
और बलवान् होतेहैं ॥ १० ॥

घनशुक्रोपचययुतः संस्थितियों महाबलः स्निग्धः
